**2.पुस्तकालयस्य पुस्तकसमीक्षाकार्यक्रम:-** कस्यापि संस्थाया: शैक्षणिकोन्नतये पुस्तकालयस्य महत्त्वपूर्णं स्थानं भवति, छात्राणामध्ययनमेव तप: अध्ययनं च पुस्तकालयेनैव सम्भवति, अत: पुस्तकपुस्तकालयो: विद्यते अभिन्नसम्बन्ध:, यतोहि पुस्तकालये सर्वविधानि पुस्तकानि समुपलभ्यन्ते। पुस्तकालयस्यापि बहव: कार्यक्रमा: छात्राणां कृते पुस्तकप्रदानात् भिन्ना: आयोज्यन्ते तेषु कार्यक्रमेषु पुस्तकसमीक्षापि एक: कार्यक्रम:, यत्र कस्यापि नूतनप्रकाशितस्य पुस्तकस्य विविधै: समीक्षकै: समीक्षा क्रियते। श्रीरघुनाथकीर्तिपरिसरे सुविस्तृत:, विविधसंसाधनै: सुसज्जितश्च पुस्तकालयो विद्यते, यस्य अध्यक्ष: श्रीनवीनडोबरियालमहोदय: पुस्तकालयस्योन्नतये निरन्तरं कृतप्रयत्नो वर्तते। 22.07.2022 दिनांके पुस्तकालयपक्षत: तेन पुस्तकसमीक्षाकार्यक्रम: समाचरित:। आंग्लसाहित्याकाशस्य प्रसिद्धकवीश्वरस्य शेक्सपीयरमहोदयस्य ग्रन्थो विद्यते जूलियससीजर:, अस्य संस्कृतेनानुवादो विहित: श्रीरघुनाथकीर्तिपरिसरस्य साहित्यप्रध्यापकेन डॉ.अनिलकुमारेण। अस्यानूदितग्रन्थस्य समीक्षाकार्यक्रमे डॉ.अवधेशचन्द्रबिजल्वाण:(आंग्लभाषाप्राध्यापक:)- डॉ.वीरेन्द्रसिंहबर्त्वाल:(हिन्दीभाषाप्राध्यापक:)-डॉ.अनिलकुमार: (साहित्यप्राध्यापक:, ग्रन्थस्यानुवादक:)- प्रो.एम्.चन्द्रशेखर:(परिसरनिदेशक:)- श्रीनवीनडोबरियाल:(पुस्तकालयाध्यक्ष:, कार्यक्रमसंयोजकश्च) मुख्यरूपेण समुपस्थिता आसन्। अत्र मूलग्रन्थस्य ग्रन्थकारस्य च विषये डॉ.अवधेशचन्द्रबिजल्वाणमहोदयेन विचारा: प्रस्तुता:, डॉ.वीरेन्द्रबर्त्वालमहोदयेन अस्य ग्रन्थस्य विभिन्नपक्षाणां समीक्षा कृता, डॉ.अनिलकुमारेण ग्रन्थस्य विहितानुवादकौशलविषये स्वविचारा: प्रकटिता:। अन्ते च निदेशकमहोदयेन ग्रन्थस्य समीक्षकाणां कृते आशीर्वचनपूर्वकं सर्वे समुद्बोधिता:। श्रीनवीनडोबरियालमहोदयेन सर्वेभ्यो धन्यवाद: प्रदत्त:। अस्मिन् कार्यक्रमे परिसरस्य सर्वे प्राध्यापका: समुपस्थिता आसन्।